संस्कृतवार्ताः

20.06.2024

सायम् - 06:20

## मुख्यवार्ताः

· प्रधानमंत्री नरेन्द्र मोदी अद्यारभ्य जम्मूकश्मीरस्य द्विदिवसीययात्रायां अस्ति। यात्रावधौ श्रीमोदी पञ्चशताधिकैकसहस्रकोटि-रूप्यकाणां विकासपरियोजनानां शिलान्यासं उद्घाटनं च करिष्यति।

· तमिलनाडुराज्यस्य कल्लाकुरिची-जनपदे विषाक्त-मद्यपानैः पंचत्रिंशत्-जनाः दिवंगताः। राजस्य मुख्यमंत्री मृतकानां परिजनेभ्यः दशलक्ष-रूप्यकाणां अनुग्रह राशेः घोषणां कृतवान्

· पटना-उच्चन्यायालयेन वंचितवर्गेभ्यः आरक्षणं पञ्चाशत् प्रतिशतम् वर्धित्वा पञ्चषष्ठीः प्रतिशतं कर्तुं बिहारप्रशासनस्य निर्णयः निरस्ती कृतः।

· मुम्बईनगरे अस्य च उपनगरीय क्षेत्रेषु नैरन्तर्येणवृष्टिः समेधमाना वर्तते। राष्ट्रिय-राजधान्यां दिल्ल्यां उष्णप्रकोपात् शैथिल्यस्य सम्भावना दृश्यते।

· आई.सी.सी. इत्येतस्यां विंशतिप्रति विंशति क्रिकेट विश्वचषक प्रतिस्पर्धायां इंग्लैण्डदलेन वेस्टइंडीजदलं सेण्टलुसियानगरे अष्टस्तोभैः पराजितम्। अद्य भारतस्य प्रतिस्पर्धा अफगानिस्तानदलेन सह भविष्यति।

## प्रधानमन्त्री-जम्मूकश्मीर

प्रधानमंत्री नरेन्द्र-मोदी अद्यारभ्य जम्मूकश्मीरस्य द्विदिवसीययात्रायां अस्ति। अस्माकं वार्ताहरः सूचितवान् यत् श्रीमोदी पञ्चशताधिकैकसहस्रकोटि-रूप्यकाणां चतुरशीतिः प्रमुखासां विकासपरियोजनानां शिलान्यासं उद्घाटनं करिष्यति। परियोजनासु मार्ग-परिवहन-सरञ्चनाः जलापूर्तियोजनाः उच्चशिक्षायां सरञ्चनागतसम्बद्धाः परियोजनाः सन्ति। प्रधानमंत्री चेनानी-पटनीटॉप-नाशरी-खण्डस्य संशोधनं प्रौद्योगिक संपदः विकासार्थं षड्-सर्वकारीय-स्नातकोपाधि-महाविद्यालयानां निर्माण सदृशानां परियोजनां आधारशिलामपि संस्थापयिष्यति। श्रीमोदी श्रीनगरे शेर-ए-कश्मीर-अन्ताराष्ट्रिय-सम्मेलन-केन्द्रे यूनां सशक्तिकरणं जम्मूकश्मीरस्य परिवर्तनं इत्याख्ये कार्यक्रमे भागं भजिष्यति। जम्मूकश्मीरस्य लब्धप्रतिष्ठित- यूनैः सह वार्तां विधास्यति। द्विसहस्राधिकेभ्यः युवभ्यः नियुक्ति पत्रमपि वितरिष्यति। तदनु श्रीमोदी एस.के.आई.सी.सी श्रीनगरे दशमं अन्तराष्ट्रिय-योग-दिवस-कार्यक्रमे भागं भजिष्यति।

## तमिलनाडु-विषाक्तमद्यपानं

तमिलनाडुराज्यस्य कल्लाकुरिची जनपदेविषाक्त मद्यपानैः पंचत्रिंशत्-जनाः दिवंगताः नवाधिकैकशतं पडुचेर्याः कल्लाकुरिची-सेलम-जिपमर-क्षेत्राणां विभिन्नेषु चिकित्सालयेषु उपचाराधीनाः वर्तन्ते। घटनां निधाय कल्लाकुरिची जनपदस्य जनपदाधिकारी अन्ये च दश अधिकारिणः पदच्युताः अभवन्। घटनायाः प्रमुखारोपी वूटलेगर- चिन्नादुरई निगडितः तस्य पार्श्वे अधिगताः द्विशतलीटरमिताः मद्याः परीक्षणार्थं सम्प्रेषिताः। ह्यः रात्रौ कल्लाकुरिची जनपदे वार्ताहरान् तमिलनाडोः स्वास्थ्यमन्त्री एम्.सुब्रहण्यमः अकथयत् यत् विषाक्तप्राप्तमद्ये मेथॉनाल इत्यस्य अधिकामात्रा प्राप्तास्ति। घटनायाः उच्चस्तरीयनिरीक्षणार्थं आदेशः प्रदत्तः।

**<u>बिहार-आरक्षणम् :</u>**

पटना-उच्चन्यायालयेन बिहार-राज्ये प्रशासकीयवृत्ति-अवसरेभ्य: शैक्षणिक-संस्थानेषु वंचित-वर्गाणां, वंचित-वर्गाणां, अनुसूचित जाति अनुसूचित जनजात्यो:कृते पञ्चाशत् प्रतिशतम् आरक्षणं वर्धित्वा पञ्चषष्ठी: प्रतिशतं कर्तुं बिहार-सर्वकारस्य निर्णय: निरस्तीकृत:। मुख्य-न्यायाधीश: के. विनोद चन्द्रन: न्यायमूर्ति: हरीश कुमार: इत्यनयो: एक: पीठ: आरक्षणं-पञ्चाशत्-प्रतिशतं वर्धित्वा पञ्चषाष्ठि: कर्तुं संवैधानिक-वैधतां-समाह्वान युतासु याचिकासु वादश्रवणस्य अनन्तरं अस्य वर्षस्य मार्च मासस्य एकादश दिनांके निर्णय: यथावत् स्थापित: आसीव्। तत्रैव झारखण्ड-राज्ये जाति-आधारित-सर्वेक्षणं भविष्यति। अयं निर्णय: मुख्यमन्त्रिण: चंपई सोरेनस्य अध्यक्षतायां मन्त्रिमण्डलस्य उपवेशने गृहीत: ।

**<u>ऋतुविभाग:</u>**

मुम्बईनगरे अपि च अस्य उपनगरीय क्षेत्रेषु ह्य: आरभ्य नैरन्तर्येणवृष्टि: समेधमाना वर्तते। राष्ट्रिय राजधान्यां दिल्ल्यां उष्णप्रकोपात् शैथिल्यस्य सम्भावना दृश्यते। ऋतु-विभागेन मुम्बई नगराय वृष्टे: पीतवार्णिकी संचेतना पालघर जनपदाय रक्तवार्णिकी ठाणे जनपदाय च नारङ्गवार्णिकी संचेता प्रख्यापिता। रायगढ-रत्नागिरी-चन्द्रपुर-गढचिरौलीजनपदेभ्य: पीतवार्णिकी संचेतनापि प्रख्यापिता।

**<u>उष्णप्रकोप: मृत्यु:</u>**

राष्ट्रिय-राजधानी-दिल्लीं समेत्य उत्तर-भारतस्य विविधा: भागा: भीषणातिभीषण-उष्णप्रकोपस्य अङ्के सन्ति। दिल्ल्या: सफदरजंग-चिकित्सालये केवलं चतुर्विंशति- होराया: अवधौ एव ग्रीष्म- सम्बद्धै: रोगै: त्रयोदश जनानां मृत्यु: जाता। तत्रैव त्रयस्त्रिंशत्-रोगिण: उपचाररता: सन्ति। दिल्ल्या: एव राममनोहर-लोहिया-चिकित्सालये ह्य: यावत् नवरोगिण: मृत्युं प्राप्तवन्त:। अन्येषु उच्च-धिकित्सालयेष्वपि ग्रीष्मप्रकोपस्य रोगीणां संख्या प्रवर्धत्येव। स्वास्थ्य-मन्त्रालयेन ह्य: एक: दिङ् निर्देश: प्रख्यापित: यस्मिन् राज्यानां स्वास्थ्यविभागान् अकथयत् यत् ते भीषण-ग्रीष्म-ऋतो: कारणेन सम्मुखागतानां रोगाणां त्वरितमेव निवारणाय तत्परा: भवेयु: अपि ससमयं उपचारसामग्रीम् उपलब्धपितुं व्यवस्था: कुर्यु:।

**<u>भूपेन्द्र-यादव:</u>**

केन्द्रीय -पर्यावरण-वन-जलवायु-परिवर्तन-मन्त्री भूपेन्द्र यादव: अद्यारभ्य उत्तराखण्डस्य दिवसीय यात्रायां भविष्यति। स: अद्य टिहरी क्षेत्रे नरेन्द्रनगर-वन-प्रभागस्य वनाग्निना प्रभावित-क्षेत्राणां यात्रां विधाय स्थिते: समांकलनं करिष्यति तथा च विभागस्य व्यवस्थाया: समीक्षामपि करिष्यति। श्री यादव: श्व: अन्ताराष्ट्रिय योग-दिवसस्यावसरे देहरादून-स्थितायां इंदिरा-गांधी-राष्ट्रीय-वन-अकादम्यां भारतीय-वन-सेवा-केन्द्रीय-राज्य-वनसेवा-अकादम्ययो: प्रशिक्षु अधिकारिभि: सह योगाभ्यासं करिष्यति।

श्रीयादव: अद्य सूरज-कुण्ड-क्षेत्रे 'एक पेड माँ के नाम' इत्यस्य कार्यक्रमस्य अन्तर्गतं मन्त्रालयस्य अधिकारिभि: कर्मचारिभि: च सह वृक्षारोपण-कार्यक्रमे भागं भजितवान् अस्मिन् अवसरे श्री यादव प्रदर्शन्या: समांकलनम् अपि कृतवान्।

## अरविंद-केजरीवाल:

दिल्ल्या: एक न्यायालय: मद्य-नीति-प्रवञ्चनाया: सम्बन्धिते धनशोधन-प्रकरणे मुख्यमन्त्रिण: अरविंद केजरीवालस्य मुक्ति-याचिकायां अद्य स्वस्य आदेश: सुरक्षित: स्थापित:। विशिष्टन्यायालस्य राउजएवेन्यू इत्यस्य अवकाश-न्यायाधीशेन न्याय-बिन्दू-इत्यनेन प्रवर्तन निदेशालय-पक्षत: अतिरिक्तोच्च-विध्याधिकारिण: एस.वी.राजू इत्यस्य याचिकां पूरित्वा निर्णय: यथावत् स्थापित: अस्ति।

## जयशङ्कर:- श्रीलंका

विदेशमन्त्री एस. जयशंकर: श्रीलंकाया: निजाधिकारिकयात्रान्तर्गतं अद्य कोलंबोनगरं सम्प्राप्तवान्। स्वीयात्रावधौ डॉ. जयशंकर: उभयो: देशयो: द्विपक्षीय-सहभागित्वस्य व्यापकेषु प्रस्ङ्गेषु श्रीलंकादेशस्य आध्यक्षेण सह उपवेशनानि करिष्यन्ति। प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे नवीनमन्त्रिमण्डलस्य निर्माणानन्तरं विदेशमन्त्रिण: इयं प्रथमा द्विपक्षीययात्रास्ति । भारतस्य समावेशि- प्रथमनीते: पुष्टिकुर्वन्ती इयं यात्रा श्रीलंकां प्रति भारतस्य निरंतरप्रतिबद्धतां रेखांकयति ।

## क्रिकेट

आई.सी.सी. इत्येतस्यां विंशतिप्रति विंशति क्रिकेट विश्वचषक प्रतिस्पर्धाया: सर्वोचाष्ट-द्वितीय समूहस्य स्पर्धायां इंग्लैण्डदलेन वेस्टइंडीजदलं सेण्टलुसियानगरे अष्टस्तोभै: पराजितम्। वेस्टइइण्डीजदलेन प्रथमक्रीडयता वल्लक्रीडनं कृत्वा अशीत्यधिकैकशतं धावनांका: स्थापिता:। अद्य समूहेस्मिन् भारतस्य प्रतिस्पर्धा अफगानिस्तानदलेन सह भविष्यति। प्रसारणञ्च रात्रौ अष्टवादने भविष्यति।

।। इति वार्ता: ।।